"वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा" मू० । "अलङ्कारशब्दस्य पृथगुपादानादनलङ्कारो" वस्तुमात्रं गृह्यते । तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यङ्ग्यो यथा । "पन्थिअ ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे । उण्णअपओहरं पेक्खिअ उण जइ वससि ता वससु" । अत्र स्रस्तरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदास्स्वेति वस्तु व्यज्यते । अलङ्काररूपो यथा "दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः । नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन् गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः" अत्र प्राकरणिकस्य उमानाममहादेवीवल्लभभानुदेवनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिकस्य पार्व्वतीवल्लभस्य वर्णनमसम्बद्धं मा प्रसाङ्क्षीदितीश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते । तदत्र उमावल्लभ उमावल्लभ इवेत्युपमालङ्कारो व्यङ्ग्यः । यथा वा "अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदः प्रभो ! । अहितः सहितः साधुयशोभिरसतामसि" । अत्रामित इत्यादावपिशब्दाभावाद्विरोधाभासो व्यङ्ग्यः व्यङ्ग्यस्यालङ्कार्य्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्य्यते" इति वृत्तिः ।

"वस्तु वालङ्कृतिर्व्वापि द्विधार्थः सम्भवी स्वतः । कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट् ॥ षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः । अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम्" मू० ॥

"स्वतः सम्भवी औचित्याद्बहिरपि सम्भाव्यमानः । प्रौढोक्त्या सिद्धो न त्वौचित्येन । तत्र क्रमेण यथा । "दृष्टिं हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति । एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः" । अनेन स्वतःसम्भविना वस्तुमात्रेण एतत्प्रतिपादिकाया भाविपरपुरुषोपभोगजनखक्षतादिगोपनरूपं वस्तुमात्रं व्यज्यते । "दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि । तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे" । अनेन स्वतः सम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते । "आपतन्तममुं दूरादूरीकृतपराक्रमः । बलोऽवलोकयामास मातङ्गमिव केसरी" । अत्रोपमालङ्काररूपेण स्वतःसम्भविना व्यञ्जकार्थेन बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते । "गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः, । ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम्" । अत्र स्वतः सम्भविना विरोधालङ्कारेणाधरो निर्दष्टः शत्रवो व्यापादिताश्चेति समुच्चयालङ्कारो व्यङ्ग्यः । "सज्जेइ सुरहिमासो ण आपणेइ जुवइजणलक्खसहे । अहिणवसहआरमुहे णअपल्लवपत्तले अणङ्गस्स सरे" । अत्र वसन्तः शरकारः कामो धन्वी युवतयो लक्ष्यं पुष्पाणि शरा इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवन्मदनविजृम्भणरूपं वस्तु व्यनक्ति ।

"रजनीषु विमलभानोः करजालेन प्रकाशितं वीर ! । धवलयति भुवनमण्डलमखिलं तव कीर्त्तिसन्ततिः सततम्" । अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्त्तिसन्ततेश्चन्द्रकरजालादधिककालप्रकाशकत्वेन व्यतिरेकालङ्कारो व्यङ्ग्यः "दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः । मणिव्याजेन पर्य्यस्ताः पृथिव्यामश्रुविन्दवः" । अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलङ्कारेण भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते । ',धम्मिल्ले नवमल्लिकासमुदयो, हस्ते सिताम्भोरुहं, हारः कण्ठतटे, पयोधरयुगे श्रीखण्डलेपो घनः । एकोऽपि त्रिकलिङ्गभूमितिलक ! त्वत्कीर्त्तिराशिर्ययौ नानामण्डनतां पुरन्दरपुरीवामभ्रुवां विग्रहे" । अत्र कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण भूमिष्ठोऽपि स्वर्गस्थानामुपकारं करोषीति विभावनालङ्कारो व्यज्यते "शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः । सुमुखि ! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः" । अत्रानेन कविनिबद्धस्य कस्यचित् कामिनः प्रौढोक्तिसिद्धेन वस्तुना तवाधरः पुण्यातिशयलभ्य इति वस्तु प्रतीयते । "सुभगे कोटिसङ्ख्यत्वमुपेत्य मदनाशुगैः । वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनाम्" । अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन कामशराणां कोटिसङ्ख्यत्वप्राप्त्या निखिलवियोगिमरणेन वस्तुना शराणां पञ्चता शरान् विमुच्य वियोगिनः श्रितेत्युत्प्रेक्षालङ्कारो व्यज्यते "मल्लिकामुकुले चण्डि ! भाति गुञ्जन्मधुव्रतः । प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव" । अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन उत्प्रेक्षालङ्कारेण कामस्यायमुन्मादकः कालः प्राप्तस्तत्कथं 'मानिनि ! मानं न मुञ्चसी'तिवस्तु व्यज्यते ।"महिलासहस्सभरिए तुह हिअअ-